NAAC A++

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे । धर्मादर्थश्च कामश्च स धर्मः किन्न सेव्यते ।।

चौधरीचरणसिंहविश्वविद्यालये मेरठे उत्तरप्रदेशे भारते

श्रीकालीचरणपौराणिकपद्मावतीनिधिना

देहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य सहयोगेन च समुत्सूयमानः

राष्ट्रियव्याससमारोहः 2026

कार्तिके यमद्वितीयातोऽष्टमीं यावत् 2083 (11 नवम्बरतः 17 नवम्बरं यावत् 2026)





मुख्यसंरक्षिका



प्रो० संगीता शुक्ला
माननीयकुलपतिः
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

प्रणेता व्याससमारोहस्य



प्रो० सुधाकराचार्यः त्रिपाठी
सम्मानिताचार्यः
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

संरक्षकः



प्रो० अतवीरः सिंहः
कलासंकायाध्यक्षः
संस्कृतविभागाध्यक्षश्च
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

मार्गदर्शकः व्याससमारोहस्य



प्रो० वाचस्पतिमिश्रः
अध्यक्षाचरः
उत्तरप्रवेशसंस्कृतसंस्थानस्य
लखनऊस्थस्य

अत्र व्याससमारोहे कार्यक्रमः संस्कृतविभागे –

11.11.2026	10:00 03:00	वावनवेलातः वादनवेलातः	शोभायात्रा यज्ञश्च उद्घाटनोत्सवः/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
12.11.2026	10:00 02:00 05:30	वावनवेलातः वावनवेलातः वावनवेलातः	अन्तर्महाविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः सामवेदकथा/सामगानम्/यौगिकबलप्रदर्शनस्य प्रतियोगिता संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
13.11.2026	10:00 02:00 05:30	वावनवेलातः वावनवेलातः वावनवेलातः	अन्तर्विद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः सांस्कृतिककार्यक्रमाः संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
14.11.2026	10:00 02:00 05:30	वादनवेलातः वादनवेलातः वादनवेलातः	कालीचरणपौराणिकस्मृतिव्याख्यानम् शोधसङ्गोष्ठी (सामवेदे विविधविद्याः) संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
15.11.2026	10:00 02:00 05:30	वादनवेलातः वादनवेलातः वादनवेलातः	अन्तर्विश्वविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः शोधसङ्गोष्ठी (सामवेदे विविधविद्याः) संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
16.11.2026	08:00	वादनवेलातः	गढमुक्तेश्वरयात्रा/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
17.11.2026	10:00	वादनवेलातः	समापनोत्सवः (पुरस्कारादिवितरणम्)

संयोजकः



डॉ० प्रशान्तः शर्मा
सहविभागाध्यक्षः
संस्कृतविभागस्य
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

सहसंयोजकौ



डॉ० नरेन्दः कुमारः
शिक्षकः संस्कृतविभागस्य
चौधरीचरणसिंहविश्वविद्यालये
मेरठे



डॉ० ओमपालः सिंहः
शिक्षकः संस्कृतविभागस्य
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

संयोजयित्रीचरी



डॉ० सन्तोषः कुमारी
शिक्षिका संस्कृतविभागस्य
चौधरीचरणसिंहविश्वविद्यालये
मेरठे

आयोजकः संस्कृतविभागः चौधरीचरणसिंहविश्वविद्यालयपरिसरस्य मेरठस्थस्य

चौधरीचरणसिंहविश्वविद्यालयः मेरठम् (उ0प्र0) भारतम्

राष्ट्रिय–मूल्याङ्कन–प्रत्यायन–परिषदा (NAAC द्वारा) सर्वोच्चश्रेण्या (A++) प्रत्यायितः)

अत्रत्येन संस्कृतविभागेन देहलीस्थस्य केन्द्रीय–संस्कृत–विश्वविद्यालयस्यानुदानेनायोज्यते

राष्ट्रियव्याससमारोहः 2026

कार्तिके यमद्वितीयातोऽष्टमीं यावत् 2083 (11 नवम्बरतः 17 नवम्बरं यावत् 2026)

सम्मान्याः कुलपतयः/अध्यक्षाः संस्कृतविभागस्य/प्राचार्याः/प्राध्यापकाः/महोदयाः

विदितं भवतु यद्यथापूर्वमत्र प्रचरिष्यति उपरिलिखितासु तिथिषु व्याससमारोहः ।
निवेद्यते यद् भवन्तः प्रतिवर्षमिव स्वयं स्वदलेन शोधपत्रेण स्वकथया कविताभिर्वा
सहागत्य अस्मान् कृतार्थयन्तु प्रतिनिधिं वा प्रेषयन्तु ।



अत्र व्याससमारोहे कार्यक्रमः संस्कृतविभागे –

11.11.2026	10:00	वादनवेलातः	शोभायात्रा यज्ञश्च
	03:00	वादनवेलातः	उद्घाटनोत्सवः/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
12.11.2026	10:00	वादनवेलातः	अन्तर्महाविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	सामवेदकथा/सामगानम्/यौगिकबलप्रदर्शनस्य प्रतियोगिता
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
13.11.2026	10:00	वादनवेलातः	अन्तर्विद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	सांस्कृतिककार्यक्रमाः
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
14.11.2026	10:00	वादनवेलातः	कालीचरणपौराणिकस्मृतिव्याख्यानम्
	02:00	वादनवेलातः	शोधसङ्गोष्ठी (सामवेदे विविधविद्याः)
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
15.11.2026	10:00	वादनवेलातः	अन्तर्विश्वविद्यालयीया संस्कृतवादविवादप्रतियोगिता/संस्कृतप्रश्नमञ्चः
	02:00	वादनवेलातः	शोधसङ्गोष्ठी (सामवेदे विविधविद्याः)
	05:30	वादनवेलातः	संस्कृतकविसमवायः/संस्कृतसम्भाषण–प्रशिक्षणम्
16.11.2026	08:00	वादनवेलातः	गढमुक्तेश्वरयात्रा/सामवेदकथा/संस्कृतसम्भाषण–प्रशिक्षणम्
17.11.2026	10:00	वादनवेलातः	समापनोत्सवः (पुरस्कारादिवितरणम्)

अत्रभवन्तः सादरमाहूयन्ते । तत्र नियमाः

1. **संस्कृतवादविवादप्रतियोगिता** विषयः– **गावो वत्सं न धेनवः। (सामवेदे पूर्वार्चिके 2.2.2)**
   प्रतिसंस्थं पक्षं विपक्षं चाश्रित्य द्वौ छात्रौ प्रवेशार्हौ । प्रतिप्रतियोगिपञ्चमिनटात्मकः कालावधिः ।
   विजेतृभ्यः प्रथमद्वितीयतृतीयपुरस्काराः पदकादिरूपाः अथ च श्रेष्ठसंस्थाकृते चलवैजयन्ती अस्ति।
   धर्मेन्द्रमणिनाम्ना पुरस्कारौ अपि दीयमानौ स्तः ।
2. **संस्कृतप्रश्नमञ्चः** –प्रतिसंस्थं द्वौ छात्रौ प्रवेशार्हौ । संस्कृतप्रश्नमञ्चे प्रश्नाः विद्यालय–महाविद्यालय–विश्वविद्यालयस्तरस्य पाठ्यक्रमाद् भविष्यन्ति।
   विजेतृभ्यः प्रथमद्वितीयतृतीयपुरस्काराः पदकादिरूपाः अथ च श्रेष्ठसंस्थाकृते चलवैजयन्ती अस्ति।
3. **वैदिकशोधसङ्गोष्ठी** –विषयः– **सामवेदे विविधविद्याः।** सम्पादकमण्डलस्य स्वीकृतिं विना किमपि शोधपत्रं प्रस्तोतुं न शक्यते । ऐषमः
   सामवेदमाश्रित्य सङ्गोष्ठ्यः चरिष्यन्ति । शोधपत्रमनिवार्यतया संस्कृतेन भवतु।
4. **संस्कृतकविसमवायः** –प्रतिदिनं सन्ध्याकाले भविष्यति। तत्र निर्बाधकविताप्रवाहो भविष्यति। श्रेष्ठकविः चलव्यासवैजयन्त्या
   सम्मानितो भविष्यति। चलव्यासवैजयन्त्या व्यासध्वजेन सह एकसहस्ररूप्यकाण्यपि सन्ति ।
5. **संस्कृतसम्भाषण–प्रशिक्षणम्** –प्रतिदिनं सन्ध्याकाले भविष्यति। भागग्रहीतृभ्यः संस्कृतसम्भाषणस्य प्रशिक्षणं तदनु च प्रमाणपत्रमपि प्रदास्यते।
6. सर्वेषु कार्यक्रमेषु –भागग्रहणसूचनाकृते शोधपत्रप्रेषणकृते चान्तिमा तिथिः **08.11.2026** विद्यते ।
7. भोजनावासव्यवस्था विद्यते –मार्गादिव्ययस्य व्यवस्था स्वस्वसंस्थातः स्वयं वा करणीया । स्वीकृते शोधपत्रे यथाव्यवस्थमारक्षितश्रेणीकमार्गव्ययस्यापि
   व्यवस्था भवितुं शक्नोति । अतः पूर्वमेव सूचनादिकं प्रेषणीयम् ।

मेरठनगरं हि भारतवर्षे उत्तरप्रदेशे दिल्लीनगरतः प्रायः 70 किलोमीटरदूरं नमोभारत–भारतीयरेल–बसमार्गैः सुसम्बद्धं मध्येगंगायमुनं प्रसिद्धमैतिहासिकं नगरम् । आगमनादिसूचनायां पूर्वप्राप्तायां मोदावहो निवासोऽत्रभवतां भवितेत्याशासे । एतादृशाः कार्यक्रमाः भवादृशां विदुषां सहयोगेनैव सफला भवन्तीति । निवेद्यते यद् भवन्त इन्द्रप्रस्थहस्तिनापुरयोरन्तराले व्यासक्रीडाभूमिपरिसरे मेरठनगरमवश्यमेवागच्छन्तु। अथ च स्वस्वविश्वविद्यालयेभ्यो महाविद्यालयेभ्यो विद्यालयेभ्यो वा प्रतियोगिच्छात्रदलं सांस्कृतिकदलमध्यापकं वा प्रतिनिधिरूपेण प्रेषयन्तु स्वयं च/वा आगत्य कृतार्थयन्तु । इति।

सम्पर्कस्थानम् – डॉ0 सुधाकराचार्यः त्रिपाठी (प्रणेता व्याससमारोहस्य, सम्मानिताचार्यः विभागाध्यक्षचरश्च संस्कृतविभागस्य)
डॉ0 पूनमलखनपालः (मार्गदर्शिका संयोजयित्रीचरी च व्याससमारोहस्य)
प्रो0 वाचस्पतिमिश्रः (मार्गदर्शकः व्याससमारोहस्य, समन्वयकचरः संस्कृतविभागस्य अध्यक्षचरश्च उत्तरप्रदेशसंस्कृतसंस्थानस्य लखनऊस्थस्य)
डॉ0 प्रशान्तः शर्मा – 8882499927 (संयोजकः व्याससमारोहस्य सह–विभागाध्यक्षश्च संस्कृतविभागस्य)
डॉ0 नरेन्द्रकुमारः – 9319780777 (सहसंयोजकः संयोजकचरश्च व्याससमारोहस्य)
डॉ0 ओमपालसिंहः – 9837417069 (सहसंयोजकः व्याससमारोहस्य)
डॉ0 सन्तोषकुमारी – 8439720212, 9359510111 (संयोजयित्रीचरी व्याससमारोहस्य)
E-mail: vyasasamarohah1992@gmail.com | sanskritvibhagccsu@gmail.com

भवतां



सयोजकः